# Shri Nimbadrilakshminrisimhaprapattih

# શ્રીનિમ્બાદ્રીલક્ષ્મીનૃસિંહપ્રપત્તિઃ

## Document Information

Text title : Shri Nimbadrilakshminrisimhaprapattih

File name : nimbAdrIlakShmInRRisiMhaprapattiH.itx

Category : vishhnu, dashAvatAra, lakShmI, prapatti

Location : doc_vishhnu

Proofread by : M K Barman

Description/comments : nRRisiMhakosha 2 upAsanA khaNDa

Latest update : August 4, 2025

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

August 4, 2025

*sanskritdocuments.org*

# શ્રીનિમ્બાદ્રીલક્ષ્મીનૃસિંહપ્રપત્તિઃ

લક્ષ્મી પક્ષિરથસ્ય વક્ષસિ ગતામબ્જે ક્ષણીમબ્જામ્ ।
ક્ષુદ્રક્ષુબ્ધદરિદ્રભક્તજનતારક્ષાદુરીણક્ષમામ્ ।
ક્ષીરોદપ્રિય પુત્રિકાન્ત્રિજગતઃ ક્ષેમઙ્કરી ભાસ્વરીમ્ ।
વન્દે નિમ્બગિરીશમેશ નૃહરેર્વામાઙ્ગગાં માતરમ્ ॥ ૧॥

જનની જગતામશેષશક્તેર્જગદીશસ્ય જનાર્દનસ્ય પત્નીમ્ ।
કમલામમલાબ્જપત્રનેત્રાં કલયે મનસા હિરણ્યવર્ણામ્ ॥ ૨॥

લક્ષ્મીપતે નરહરે નતભક્તપાલ
નારાયણાશ્રિત સુખપ્રદ દૈત્યહારિન્ ।
નિમ્બાદ્રિકન્દરનિવાસ સુરેશવન્દ્ય
લક્ષ્મીનૃસિંહચરણૌ શરણં પ્રપદ્યે ॥ ૩॥

ભક્તસ્સમર્પિત પવિત્રસહસ્રનામ
પૂજાવિધીય તુલસીદલશોભમાનૌ ।
પ્રાપ્યાં ભવાબ્ધિતરણે તરણિસ્સ્વરૂપાં
નિમ્બાદ્રિનાથચરણૌ શરણં પ્રપદ્યે ॥ ૪॥

કાલીયમસ્તકમણીન્દ્ર વિશેષશોભા
નીરાજિતો સુરનદીજનનાલવાલોમ્ ।
ભૂમ્યન્તરિક્ષ પરિમાપક માનદણ્ડોં
નિમ્બાદ્રિનાથચરણૌ શરણં પ્રપદ્યે ॥ ૫॥

રાજીવચક્રરથશઙ્ખઘટાતપત્ર
સન્તાનહસ્તિમણિવજવિશેષચિન્હેઃ ।
યુક્તૌ સુરાસુરકિરીટમણિદ્યુભાસાં
નિમ્બાદ્રિનાથચરણૌ શરણં પ્રપદ્યે ॥ ૬॥

પદ્માક્ષમાદિમહિષિભિરદભ્રભીત્યા

સંવાહ્યમાનમૃદુલૌ મધુરાયમાનામ્ ।
તાપત્રયાતુરજનસ્ય શરણ્યભૂતૌ
નિમ્બાદ્રિનાથચરણૌ શરણં પ્રપદ્યે ॥ ૭॥

પઙ્કેરુહદ્વયસમાગમસુન્દરૌ તૌ
ભક્તાક્ષિભૃઙ્ગપરિવેષ્ટિતનીલશોભામ્ ।
રાકાકલાધરદશેવ નખપ્રકાશાં
નિમ્બાદ્રિનાથ ચરણૌ શરણં પ્રપદ્યે ॥ ૮॥

સદ્ભક્તમાનસસરોવરરાજહંસા
સાઙ્ગાખિલશ્રુતિશિરોમકટાયમાનામ્ ।
બ્રહ્માદિકીરજગદેકશરણ્યભૂતૌ
નિમ્બાદ્રિનાથ ચરણૌ શરણં પ્રપદ્યે ॥ ૯॥

પ્રહ્લાદગૌતમસતી મુચકુન્દ પાર્થ
ભીષ્માદિભક્તજનસંવિતભવ્યરૂપૌ ।
સર્વાઘશાન્તિકરસર્વશરણ્યભૂતે
નિમ્બાદ્રિનાથ ચરણૌ શરણં પ્રપદ્યે ॥ ૧૦॥

ગોવિન્દલાન્વયસુધાકરનારસિંહ
શ્રીશ્રીનિવાસગુરુપુઙ્ગવયુગ્મકેન ।
પ્રાપ્યૌ તવેતિ મમદર્શિતપૈતૃકસ્વૌ
નિમ્બાદ્રિનાથ ચરણૌ શરણં પ્રપદ્યે ॥ ૧૧॥

ઇતિ શ્રીનિમ્બાદ્રીલક્ષ્મીનૃસિંહપ્રપત્તિઃ સમ્પૂર્ણા ।

Proofread by M K Barman

*Shri Nimbadrilakshminrisimhaprapattih*

pdf was typeset on August 4, 2025

Please send corrections to *sanskrit@cheerful.com*